Adda247 GET IT ON Google Play



**98.** 'युष्माकम्' शब्दस्य व्युत्पत्तिः दीयताम् ?

(1) युष्मद् + षष्ठी बहुवचनम्

(2) एतद् + षष्ठी बहुवचनम्

(3) अस्मद् + षष्ठी बहुवचनम्

(4) त्वत् + षष्ठी बहुवचनम्

**99.** 'उत्तीर्णः' इत्यस्मिन् पदे कः धातुः कः प्रत्ययः ?

(1) तीर् + क्त

(2) तृ + क्त्वा

(3) तीर् + णिच्

(4) तृ + क्त

***निर्देशः :*** *अधोलिखितान् श्लोकान् पठित्वा तदाधारितप्रश्नानां (प्रश्नसङ्ख्या 100 – 105) विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चिनुत ।*

शान्तितुल्यं तपो नास्ति न सन्तोषात्परं सुखम् ।
न तृष्णायाः परो व्याधिर्न च धर्मो दयापरः ।।1।।

दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ।
शास्त्रपूतं वदेद् वाक्यं मनःपूतं समाचरेत् ।।2।।

तावद् भयाद्धि भेतव्यं यावद् भयमनागतम् ।
आगतं तु भयं दृष्ट्वा नरः कुर्याद् यथोचितम् ।।3।।

माता शत्रुः पिता वैरी येन बालो न पाठितः ।
न शोभते सभामध्ये हंसमध्ये बको यथा ।।4।।

रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ।।5।।

**100.** सन्तोषात् परं किम् नास्ति ?

(1) सुखम्

(2) धनम्

(3) अकर्मण्यम्

(4) प्रमादः

**101.** कीदृशं जलं पिबेत् ?

(1) संक्रमणरहितम्

(2) मिष्टम्

(3) वस्त्रपूतम्

(4) मन्त्रपूतम्

**102.** आगतं भयं दृष्ट्वा नरः किं कुर्यात् ?

(1) शस्त्रैः युध्येत

(2) यथोचितम् कुर्यात्

(3) पलायेत्

(4) कुत्रचिद् निगूहेत्

**103.** 'शान्तितुल्यम्' इत्यस्मिन् प्रयोगे कः अलङ्कारः ?

(1) अनुप्रासः

(2) श्लेषः

(3) उपमा

(4) दृष्टान्तः

**104.** 'येन बालो न पाठितः' वाक्यम् इदम् कस्य वाच्यस्य ?

(1) भाववाच्यस्य

(2) भावकर्मवाच्यस्य

(3) कर्तृवाच्यस्य

(4) कर्मवाच्यस्य

**105.** 'वस्त्रपूतम्' इत्स्मिन प्रयोगे सविग्रहः समासः निर्दिश्यताम् ?

(1) वस्त्रेण पूतम् – तृतीया तत्पुरुषः

(2) वस्त्राणि पूतानि यस्य – बहुव्रीहिः

(3) वस्त्राय पूतम् – चतुर्थी तत्पुरुषः

(4) वस्त्रं च पूतम् – द्वन्द्व समासः

Adda247 GET IT ON Google Play



**130.** मेघनादः कस्य नाम आसीत् ?

(1) मण्डूकस्य

(2) चटकस्य

(3) गजस्य

(4) खगस्य

**131.** काष्ठकूटः चटकां कस्य समीपम् अनयत् ।

(1) गजस्य समीपम्

(2) जलाशयस्य समीपम्

(3) मण्डूकस्य समीपम्

(4) मक्षिकायाः समीपम्

**132.** 'अन्तिके' इत्यस्य शब्दस्य निम्नलिखितेषु कोऽर्थः ?

(1) मार्गे

(2) समीपम्

(3) वृत्तान्तः

(4) सायंकाले

**133.** 'मत्वा' शब्दस्य निर्वचनम् निम्नलिखितेषु किम् अस्ति ?

(1) मत् + वा

(2) मा + त्वा

(3) मन् + क्त्वा

(4) मत् + क्त्वा

**134.** 'तृषार्तः' इत्यस्य शब्दस्य विग्रहं कृत्वा समासस्य नाम दीयताम् ।

(1) तृषया आर्तः य सः तृषार्तः  बहुव्रीहिः

(2) तृषायै आर्तः  चतुर्थी तत्पुरुषः

(3) तृषायाः आर्तः  पञ्चमी तत्पुरुषः

(4) तृषया आर्तः  तृतीया तत्पुरुषः

**135.** 'यथोचितम्' अत्र सन्धिविच्छेदं कृत्वा सन्धेर्नाम निर्दिश्यताम् ।

(1) यथा + ओचितम्  गुणसन्धिः

(2) यथा + औचित्यम्  वृद्धिसन्धिः

(3) यथा + उचितम्  गुणसन्धिः

(4) यथा + उचितम्  वृद्धिसन्धिः

***निर्देशः :*** *सर्वाधिकं समीचीनं विकल्पं चित्वा निम्नलिखितप्रश्नानाम् (प्रश्नसङ्ख्या 136 – 150) उत्तरं दीयताम् ।*

**136.** कस्मिन् प्रविधौ छात्राणां प्रथमा भाषा पाठने मुख्य भूमिकां निर्वहति ?

(1) सम्प्रेषणात्मक-भाषाशिक्षण प्रविधौ

(2) कार्याधारित-शिक्षणे

(3) प्रत्यक्षप्रविधौ

(4) व्याकरणानुवाद प्रविधौ

**137.** चेतनस्य प्रथमा भाषा भोजपुरी आसीत् । यस्मात् कालात् स तमिलनाडू गतवान् स भोजपुरी न ब्रवीति तथा तद्देशीयैः सह आंग्लभाषां भाषते । यदा नवीना द्वितीया भाषा देशीय भाषां स्थापन्नां करोति । एतद् निम्नलिखितस्य उदाहरणम् अस्ति –

(1) कूटमिश्रणस्य

(2) कूटपरिवर्तनस्य

(3) द्विभाषीयतायाः

(4) न्यूनीकर्त्री द्विभाषीयतायाः

Adda247 GET IT ON Google Play



**138.** निम्नलिखितेषु किं पूर्व-पठनक्रियां प्रोत्साहयति ?

(1) पाठस्य सारलेखनाय छात्राणां प्रेरणम्

(2) व्याकरण संरचनायाः पाठनम्

(3) भावानुवादकार्यम्

(4) सम्भाव्यकार्यम्

**139.** संशोधनात्मक-अध्यापनस्य विषये किं सत्यम् अस्ति ?

(1) कार्यप्रगतिं वर्धितुं सहायताप्रदानम्

(2) कार्यप्रगतिं प्रोत्साहयितुं अतिरिक्तअङ्क प्रदानम्

(3) योग्यछात्रेभ्यः अतिरिक्तं ध्यानप्रदानम्

(4) पृष्ठगामिछात्रेभ्यः सहानुभूतिः प्रदानम्

**140.** *कथनम् (A) :*

भारतवर्षे आंग्लभाषा सहभाषा वर्तते ।

*कारणम् (R) :*

भारतीयविद्यालयेषु आंग्लभाषा विदेशीभाषारूपेण पाठ्यते ।

निम्नलिखितेषु समीचीनम् उत्तरं चिनुत ।

(1) (A) सत्यम् अस्ति, परं (R) असत्यम् अस्ति ।

(2) (A) असत्यम् अस्ति, परं (R) सत्यम् अस्ति ।

(3) (A) तथा (R) उभे सत्ये स्तः तथा च (R), (A) इत्यस्य समीचीनं व्याख्यानम् अस्ति ।

(4) (A) तथा (R) उभे सत्ये स्तः, परं (R), (A) इत्यस्य समीचीनं व्याख्यानं ***नास्ति*** ।

**141.** निम्नलिखितेषु किं भाषायाः विशेषता ***नास्ति*** ?

(1) भाषा सांकेतिकी अस्ति ।

(2) भाषा सामाजिकी अस्ति ।

(3) भाषा व्यवस्थिता अस्ति ।

(4) भाषा स्थिरा अस्ति ।

**142.** *कथनम् (A) :*

पूर्वज्ञानस्य स्मृत्यर्थं छात्राणां प्रेरणम् महत्त्वपूर्णम् अस्ति ।

*कारणम् (R) :*

पूर्वज्ञानस्य स्मृतिः पूर्वज्ञानं नवीनज्ञानेन सह योजने छात्राणां सहायतां करोति ।

निम्नलिखितेषु समीचीनम् उत्तरं चिनुत ।

(1) (A) सत्यम् अस्ति, परं (R) असत्यम् अस्ति ।

(2) (A) असत्यम् अस्ति, परं (R) सत्यम् अस्ति ।

(3) (A) तथा (R) उभे सत्ये स्तः तथा (R), (A) इत्यस्य समीचीनं व्याख्यानम् अस्ति ।

(4) (A) तथा (R) उभे सत्ये स्तः, परं (R), (A) इत्यस्य समीचीनं व्याख्यानं ***नास्ति*** ।

**143.** अष्टमीकक्षायाः अध्यापकः स्वछात्रान् गृहे ऊर्जासंरक्षणविषये दत्तकार्यरूपे (Assignment) पत्रकं प्रस्तौतुं कथयति । इदं कार्यं भाषायां कां विशेषतां वर्धयिष्यते ?

(1) प्रश्नरूपाणि

(2) तुलनात्मकम् वाक्यम्

(3) भूतकालम्

(4) सकारात्मक-आज्ञार्थकवाक्यम्

Adda247 GET IT ON Google Play



**144.** पाठ-सज्जीकरणान्तर्गते एकम् उद्देश्यम् इदम् अस्ति यत् छात्र: ग्राहकै: सह व्यापारिकसम्प्रेषणं कुर्यु: । उद्देश्यमिदं निम्नलिखितेषु एकस्य समजातीयमस्ति –

(1) प्रतिवेदनम्

(2) लेख:

(3) पत्रम्

(4) वर्णनम्

**145.** कश्चिद् अध्यापक: छात्रान् चित्रे चत्वारि संगीतयन्त्राणि द्रष्टुं कथयति तदा चर्चां कर्तुं कथयति यदेतानि भिन्नानि यन्त्राणि केषु-केषु सन्दर्भेषु प्रयुज्यन्ते । संज्ञानात्मकं कौशलं निम्नलिखितेषु विकल्पेषु चिनुत यस्य मेलनं उपरिष्टात् कथितया क्रियया भवति ।

(1) विश्लेषणम्

(2) तर्कणम्

(3) कल्पना

(4) लेखनम्

**146.** यदा एकभाषीयवक्तार: तस्या: एव भाषाया: औपचारिकस्वरूपाद् अनौपचारिकस्वरूपं गच्छन्ति, तदा तेषां कार्यं कथ्यते –

(1) कूट-मिश्रणम् (Code-mixing)

(2) उपभाषा (Dialects)

(3) समाज-भाषाविज्ञानम् (Sociolinguistics)

(4) कूट-परिवर्तनम् (Code-switching)

**147.** छात्राणां स्वसमाजे अनौपचारिक-अन्त:सम्पर्क:, मित्रता परस्परं सम्बन्धाश्च भाषाया निम्नलिखित स्वरूपमाश्रितम् अस्ति ।

(1) अङ्गीकरणम् (Accommodation)

(2) भाषा-समाजीकरणम् (Language socialization)

(3) संस्कृतिकरणम् (Enculturation)

(4) समीकरणम् (Assimilation)

**148.** शब्दावली-प्रयोगे व्याकरणं छात्राणां कृते निम्नलिखितकार्येषु मार्गप्रदर्शनम् करोति –

(1) शब्दकोशीयसामग्रीं अर्थपूर्णे तथा सम्प्रेषणीय-अभिव्यक्तौ संयोजने ।

(2) उच्चकक्षासु लेखनांशानां औपचारिक-प्रारूपनिर्माणे ।

(3) औपचारिक-परिस्थितिषु शुद्धतया विश्वासेन सह भाषणे ।

(4) निवेशरूपेण शब्दान् श्रुत्वा भाषणसमये पुन: कथने ।

**149.** छात्राणां अध्ययन-अध्यापन कार्ये निम्नलिखितेषु कक्षायां किं ***न*** साधनम् ?

(1) कक्षापुस्तकालय: (Classroom library)

(2) कक्षा-कार्यविधय: (Classroom procedures)

(3) शब्दभित्ति: (Word wall)

(4) पठनकोण: (Reading corner)

**150.** *कथनम् (A) :*

व्यक्तिगत शिक्षणाय भाषाशिक्षकेण योजना निर्मातव्या ।

*कारणम् (R) :*

नवीन भाषाणां शिक्षणे छात्रेषु वैविध्यं वर्तते ।

निम्नलिखितेषु समीचीनम् उत्तरं चिनुत ।

(1) (A) सत्यम् अस्ति, परं (R) असत्यम् अस्ति ।

(2) (A) असत्यम् अस्ति, परं (R) सत्यम् अस्ति ।

(3) (A) तथा (R) उभे सत्ये स्त: तथा च (R), (A) इत्यस्य समीचीनं व्याख्यानम् अस्ति ।

(4) (A) तथा (R) उभे सत्ये स्त:, परं (R), (A) इत्यस्य समीचीनं व्याख्यानं ***नास्ति*** ।

